## पञ्चमाध्यायस्य तृतीयः पादः

### प्राग्दिशो विभक्तिः । (१/१९४७)

‘दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः’ (५.३.२७/१९७४) इति वक्ष्यति । प्रागेतस्माद् दिक्संशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामो विभक्तिसञ्ज्ञास्ते वेदितव्याः । वक्ष्यति – ‘पञ्चम्यास्तसिल्’ (५.३.७/१९५३) । ततः । [1]यतः । कुतः । [2]तसिलादीनां विभक्तित्वे प्रयोजनं त्यदादिविधयः इदमो विभक्तिस्वरश्च । [3]इह । ऊडिदम् (६.१.१७६/३७१७) इति विभक्त्युदात्तत्वं सिद्धं भवति । [4]अतः परं स्वार्थिकाः प्रत्ययाः, तेषु समर्थाधिकारः प्रथमग्रहणं च प्रतियोग्यपेक्षत्वान्नो[5]पयुज्यते इति निवृत्तम् । [6]वावचनं तु वर्तत एव । तेन विकल्पेन तसिलादयो भवन्ति, कुतः, कस्मात्, [7]कुत्र, कस्मिन् इति ॥

### किंसर्वनामबहुभ्योऽद्व्यादिभ्यः । (२/१९४८)

प्राग्दिशः इत्येव । किमः सर्वनाम्नो बहुशब्दाच्च प्राग्दिशः प्रत्ययाः वेदितव्याः[8] । सर्वनामत्वात् [9]प्राप्ते ग्रहणे [10]द्व्यादिपर्युदासः क्रियते । कुतः, कुत्र । यतः, यत्र । ततः, तत्र । बहुतः, बहुत्र । अद्व्यादिभ्यः इति किम् ? द्वाभ्याम् । द्वयोः । [11]प्रकृतिपरिसङ्ख्यानं किम् ? वृक्षात् । वृक्षे । प्राग्दिशः इत्येव, वैयाकरणपाशः[12] । सर्वनामत्वादेव [13]सिद्धे किमो ग्रहणं द्व्यादिपर्युदासात्[14] ।

[६०५] [15]बहुग्रहणे सङ्ख्याग्रहणम् । (म.भा. २.४०२)

[16]इह न भवति, बहोः सूपात्, बहौ सूपे इति ॥

### इदम इश् । (३/१९४९)

प्राग् दिशः । इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु प्रत्ययेषु परतः । शकारः सर्वादेशार्थः । इह[17] ॥

### एतेतौ रथोः । (४/१९६०)

[18]रेफथकारादौ प्राग्दिशीये प्रत्यये परतः [19]इदमः एतेतौ [20]आदेशौ भवतः । इशोऽपवादः । रेफेऽकार उच्चारणार्थः । ‘इदमोर्हिल्’ (५.३.१६/१९६५) - एतर्हि । ‘इदमस्थमुः’ (५.३.२४/१९७२) – इत्थम् ॥

---

1. यतः नास्ति फ. 2. बहुलं इत्यधिकम् फ. 3. इत इत्यत्र ड. 4. इतः परम् ब.क.फ. 5. नोपपद्यत क. 6. वाग्रहणम् क. 7. कुत्र नास्ति फ. 8. द्व्यादीनि वर्जयित्वा इत्यधिकम् ग.क.ड.फ.ह. 9. द्व्यादिग्रहणे प्राप्ते क. 10. अद्व्यादिभ्यः इति क. ड. 11. प्रकृतिग्रहणम् क. 12. छान्दसपाशः इत्यधिकम् क. 13. किमो ग्रहणे सिद्धे द्व्यादिपर्युदासात् न प्राप्नोति इति किमो ग्रहणम् क. 14. किमः पर्युदासेन मा भूत् इत्यधिकम् ड. 15. बहुशब्देन क. 16. तेन इत्यधिकम् क. 17. इतः इत्यधिकम् क.ड.ग.फ.ह. 18. रेफादौ थकारादौ च ड.फ. 19. इतः ड. 20. यथासंख्यम् इत्यधिकम् क.फ.